## तत्र च दीयते कार्यं भववत् । (९६/१७६०)

तत्र इति सप्तमीसमर्थात् कालवाचिनः प्रातिपदिकाद् दीयते, कार्यम् इत्येतयोरर्थयोर्भववत् प्रत्ययो भवति । यथा – मासे भवं मासिकम्[1] । सांवत्सरिकम् (४.३.११/१३८१) । प्रावृषेण्यम् (४.३.१७/१३८८) । वासन्तिकम् (४.३.११/१३८१) । [2]वासन्तम् । (४.३.१६/१३८७) । हैमनम् (४.३.२२/१३९०) । [3]हैमन्तम् (४.३.१६/१३८७) । हैमन्तिकम् (४.३.११/१३८१) । शारदम् (४.३.१६/१३८७) ।

वतिः सर्वसादृश्यार्थः । योगविभागश्चात्र कर्तव्यः, '[4]तत्र च दीयते,' 'यज्ञाख्येभ्यः' [5]इति । [6]आग्निष्टोमिकं भक्तम् । राजसूयिकम् । [7]वाजपेयिकम् । कालाधिकारस्य पूर्णोऽवधिः । अतः परं सामान्येन[8] प्रत्ययविधानम् ॥

## व्युष्टादिभ्योऽण् । (९७/१७६१)

तत्र इति सप्तमीसमर्थेभ्यः व्युष्टादिभ्यः[9] दीयते, कार्यम् इत्येतयो[10]रण् प्रत्ययो भवति । व्युष्टे दीयते कार्यम् वा वैयुष्टम् । नैत्यम् ।

[५३२] अण्प्रकरणेऽग्निपदादिभ्य उपसङ्ख्यानम्[11] । (म.भा. २.३६२)

[12]आग्निपदम् । पैलुमूलम् । किं वक्तव्यम् ? न वक्तव्यम् । अत्रैव ते पठितव्याः ।

व्युष्ट । नित्य । निष्क्रमण । प्रवेशन । [13]तीर्थ । [14]सम्भ्रम । आस्तरण । सङ्ग्राम । सङ्घात । अग्निपद । पीलुमूल । [15]प्रवास । उपसङ्क्रमण[16] । व्युष्टादिः ॥

## तेन यथाकथाचहस्ताभ्यां णयतौ । (९८/१७६२)

दीयते, [17]कार्यम् इति वर्तते । तेन इति तृतीयासमर्थाभ्यां यथाकथाचहस्तशब्दाभ्यां यथासङ्ख्यं णयतौ प्रत्ययौ भवतः । दीयते, कार्यम् इत्येतयोरर्थयोः प्रत्येकमभिसम्बधः, यथासङ्ख्यं नेष्यते । यथाकथाचशब्दोऽव्ययसमुदायोऽनादरे वर्तते । तृतीयार्थमात्रं चात्र संभवति, न [18]तु तृतीया समर्थविभक्तिः । यथाकथाच दीयते कार्यं वा याथाकथाचम् । हस्तेन दीयते कार्यं वा हस्त्यम् ॥

## सम्पादिनि । (९९/१७६३)

[19]तेन इत्येव । तृतीयासमर्थात् सम्पादिन्यभिधेये ठञ् प्रत्ययो भवति । गुणोत्कर्षः सम्पत्तिः । आवश्यके णिनिः (३.३.१७०/३३११) । [20]कर्णवेष्टकाभ्यां संपादि मुखं कार्णवेष्टकिकं [21]मुखम् । वास्त्रयुगिकं शरीरम् । वस्त्रयुगेन विशेषतः शोभते इत्यर्थः ॥

---

1. एवं मासे दीयते कार्यं वा मासिकम् । आर्धमासिकम् इत्यधिकम् ब.क.ड.फ.ह. 2. वासन्तं नास्ति फ. 3. हैमन्तिकं नास्ति ह. 4. तदेव च फ. 5. वर्तते इत्यधिकम् क. 6. अग्निष्टोमे दीयते इत्यधिकम् क. 7. वाजपेयिकम् नास्ति ड. 8. अन्येन इत्यधिकम् ब, विधानम् फ, प्रत्ययः क. 9. प्रातिपदिकेभ्यः इत्यधिकम् क. ड. 10. अर्थयोः इत्यधिकम् क.ड. 11. कर्तव्यम् इत्यधिकम् क.ड.फ. 12. आग्निपदम् – न वक्तव्यम् नास्ति ह.ग. 13. तीर्थ नास्ति क.ड. 14. सम्भ्रम नास्ति फ. ह. 15. प्रवास नास्ति फ. ह. 16. दीर्घ उपवास इत्यधिकम् ब. 17. कार्यम् नास्ति फ. 18. तेन क. 19. तेन इत्येव नास्ति फ, तेन इति क. 20. कर्णवेष्टनाभ्याम् क. 21. मुखम् नास्ति क.